नं. ७१६-घ

ऋग्वेद तृतीयब्राह्मण: (अपूर्ण:)

(शतपथ ब्राह्मण:)

पत्रे ५०

नं० ७१९-घ

पत्राणि ५०

१५०

नः कामेयुः। विदूरं ग्रामयोर्ग्रामान्तौ स्यातां॥२॥ ऋक्षीकाः पुरुषव्याघ्राः परिमोषिण आ
व्याधिनीस्तस्करा अरण्येष्वाजायेरन्। तदाहुः। अपशवो वा एते। यदारण्याः। यदारण्यैः
संस्थापयेत्। क्षिप्रे यजमानमरण्यं मृतं हरेयुः। अरण्यायतना ह्यारण्याः पशव
इति। यत्पशून्नालभेत। अवरुद्धा अस्य पशवः स्युः। यत्पर्यग्निकृतानुत्सृजेत्॥३॥ यज्ञ ता
शू वेशसं कुर्यात्। यत्पशून्नालभेत। तेनैव पशूनवरुं[illegible]धे। यत्पर्यग्निकृतानुत्सृजति सप
ज्ञवेशसाय। अवरुद्धा अस्य पशवो भवंति। न यज्ञवेशसं भवति। न यजमा
नमरण्यं मृतं हरंति। ग्राम्यैः सं[illegible]स्थापयति। एते वै पशवः क्षेमो नाम। संपि
तापुत्रावस्यतः। समध्यानः क्रामंति। समंतिकं ग्रामयोर्ग्रामान्तौ भवतः। नर्क्षी
काः पुरुषव्याघ्राः परिमोषिण आव्याधिनीस्तस्करा अरण्येष्वाजायंते॥
॥४॥ ऋतवस्या तामुत्सृजेत्स्यत स्त्रीणि च॥१॥ प्रजापतिरकामयतोमो

श्रा॰त॰

॥१०१॥ लोकाववरुंध्यीयेति। सएतानुभयान्पशूनपश्यत्। ग्राम्यांश्चारण्यांश्च। तानालभत। तैर्वैसउ
भौलोकाववारुंध। ग्राम्यैरेवपशुभिरिमंलोकमवारुंध। आरण्यैरमुं। यद्ग्राम्यान्पशूना
।०। लभंते। इममेवतैर्लोकमवरुंधे। यदारण्यान्॥१॥ अमुंतैः। अनवरुद्धोवाएतस्यसंवत्स
रइत्याहुः। यऋतऊतश्चातुर्मास्यानिसंवत्सरंप्रयुंक्त इति। एतावान्वैसंवत्सरः। यच्चातुर्मास्या
नि। यदेतेचातुर्मास्याःपशवआलभ्यंते। प्रत्यक्षमेवतैःसंवत्सरंयजमानोवरुंधे। वि
वाएषप्रजयापशुभिर्ऋध्यते। यःसंवत्सरप्रयुङ्क्। संवत्सरःस्वर्गोलोकः॥२॥ स्वर्गाल्
लोकंनापराध्नोति। प्रजावैपशवएकादशिनी। यदेतएकादशिनाःपशवआलभ्यंते।
साक्षादेवप्रजांपशून्यजमानोवरुंधे। प्रजापतिर्विराजमसृजत। साऽस्मात्सृष्टाश्वमेधंप्रा
विशत्। तांदशिभिरनुप्रायुंक्त। तामाप्नोत्। तामाप्त्वादशिभिरवारुंध। यद्दशिनआ
लभ्यंते॥३॥ विराजमेवतेराप्त्वायजमानोवरुंधे। एकादशदशतआलभ्यंते। एकाद
शाक्षरात्रिष्टुप्। त्रैष्टुभाःपशवः। पशूनेवावरुंधे। वैश्वदेवोवाअश्वः। नाना

देवसायुज्या वोऽभवंति। अथ सर्वस्याय। नाना रूपा भवंति। तस्मान्नानारूपाः पशवः। बहु
द्व २ रूपा भवंति। तस्माद्बहुरूपाः पशवः समृध्यै॥ ४॥ आरण्यांल्लोदशिन आलभ्यं। नैना
नारूपाः पशवो द्वेव॥ ३॥ असमे वै लोका यग्राम्याः पशव आलभ्यंते। अमुष्मा आरण्याः।
यद्ग्राम्यान्यश्च नालभते। इममेव तैर्लोकमवरुंध्ये। यदारण्यान्। अमुं तैः। उभयान्यश्च ना
लभते। ग्राम्यांश्चारण्यांश्च। उभयोर्लोकयोरवरुध्यै। उभयान्पशून्नालभते॥ १॥
ग्राम्यांश्चारण्यांश्च। उभयस्यान्नाद्यस्यावरुध्यै। उभयान्पशून्नालभते। ग्राम्यांश्
चारण्यांश्च। उभयेषां पशूनामवरुध्यै। त्रयस्त्रयो भवंति। त्रय इमे लोकाः। एषां लो
कानामाप्त्यै। ब्रह्मवादिनो वदंति। कस्मात्सत्यात्॥ २॥ अस्मिंल्लोके बहवः कामाइ
ति। यत्समानीभ्यो देवताभ्यो न्येन्ये पशव आलभ्यंते। अस्मिन्नेव तल्लोके कामांद

ब्रा०२०
॥१०२॥
१०२

धाति। तस्मादस्मिंल्लोके बहवः कामाः। त्रयाणांत्रयाणाꣳसहवपा जुहोति। त्र्यावृतोवैदेवाः। त्र्या
वृतइमेलोकाः। एषांलोकानामाप्त्यै। एषांलोकानांकॢप्त्यै। पर्यग्नि[illegible]कृतानारण्यानुत्सृजं
त्यहिꣳसायै॥३॥ उभयान्पशूनालभंते। सत्यादहिꣳसायै।॥३॥ युंजंतिब्रध्नमित्याह।
असौवाआदित्योब्रध्नः। आदित्यमेवास्मैयुनक्ति। अरुषमित्याह। अग्निर्वाअ
रुषः। अग्निमेवास्मैयुनक्ति। चरंतमित्याह। वायुर्वैचरंन्। वायुमेवास्मैयुन
क्ति। परितस्थुषइत्याह॥१॥ इमेवैलोकाःपरितस्थुषः। इमानेवास्मैलोका
न्युनक्ति। रोचंतेरोचनादिवीत्याह। नक्षत्राणिवैरोचनादिवि। नक्षत्राण्ये
वास्मैरोचयति। युंजंत्यस्यकाम्येत्याह। कामानेवास्मैयुनक्ति। हरीविपक्षसे
त्याह। इमेवैहरीविपक्षसा। इमेएवास्मैयुनक्ति॥२॥ शोणाधृष्णून्नृवाहसे ॥१०२॥

स्वाहा। अहोरात्रे वै न वाहसा। अहोरात्रे एवास्मै युनक्ति। एता एवास्मै देवता युनक्ति। सुवर्गस्य लोकस्य समष्ट्यै। केतुं हृ एवं न केतवइ इति च्छं जं प्रतिमुं चति। यश एवैनं राज्ञां गमयति। जीमुतस्येव भवति प्रतीकमित्याह। यथा यजुरेवैतत्। राये नेपथा नः सवितः प्रत्यीसइत्यध्वयुर्यजमानेन वाचयत्यमिजित्यै॥३॥ परावा एतस्य यज्ञ एति। यस्य पशुरुपाकृतोऽन्यत्र वेद्या एति। एतं स्तोतरेतेन पथा पुनरश्व मावर्तसि नइत्याह। वायुर्वै स्तोता। वायुमेवास्य पुरस्ताद्दधात्यावृत्ये। यथा वेह विषोऽग्रहीतस्य स्कंदति। एवं वा एतदश्वस्य स्कंदति। यदस्योपाकृतस्य लोमानि शीर्यन्ते। यद्वालेषुकाचानावयंति। लोमान्येवास्य तत्संरभरंति॥४॥ भूर्भुवः सुवरिति प्राजापत्याभिरावयंति। प्राजापत्यो वा अश्वः। स्वयैवेनं दे

श्रा०र०
॥१०३॥
103

वतयासमर्धयंति। भूरितिमहिषी। भुवइतिवावाता। सुवरितिपरिवृक्ती। एषांलोकानाम
भिजित्यै। हिरण्मयाःकाचाभवंति। ज्योतिर्वैहिरण्यं। राष्ट्रमश्वमेधः॥५॥ ज्योतिश्चैवा
स्मैराष्ट्रंचसमीचीदधाति। सहस्रंभवंति। सहस्रसंमि[illegible]तःसुवर्गोलोकः। सुवर्ग
स्यलोकस्याभिजित्यै। अपवाएतस्मात्तेजइंद्रियंपशवःश्रीः[illegible]क्रामंति। योश्वमेधेनय
जते। वसवस्त्वांजंतुगायत्रेणछंदसेतिमहिष्यभ्यनक्ति। तेजोवाआज्यं। तेजोगाय
त्री। तेजसैवास्मैतेजोवरुंधे॥६॥ रुद्रास्त्वांजंतुत्रैष्टुभेनछंदसेतिवावाता। तेजोवाआ
ज्यं। इंद्रियंत्रिष्टुप्। तेजसैवास्माइंद्रियमवरुंधे। आदित्यास्त्वांजंतुजागतेनछंदसे
तिपरिवृक्ती। तेजोवाआज्यं। पशवोजगती। तेजसैवास्मैपशूनवरुंधे। पत्नयो
भ्यंजंति। श्रियावाएतद्रूपं॥७॥ यत्पत्नयः। श्रियमेवास्मिंदधाति। नास्मा

॥१०३॥

तेजसं इंद्रियं पशवः श्रीरपक्रामंति। त्वा जीमूतावीं रत्यशो मम्मां उइत्य। निरिक्तमेनमश्वायोपा
हरंति। प्रजा मे वा नाधीकुर्वंते। एतदेवाश्वमम्नैतद्वनमद्भिः प्रजाप इत्याह। प्रजायामे
वान्नाद्यं दधते। यदिनाव जिघ्रेत्। अग्निः पशुरासीदित्यव घ्रापयेत्। अवैदै वजिघ्रति।
आक्रान्वाजीक्रमैरत्यक्रमीद्वाजी द्यौस्तेपृष्ठं पृथिवी सधस्थमित्यश्वमनुमंत्रयते। ए
षां लोकानामभिजित्यै। समिद्धो अजन्कदरं मतीनामित्यश्वस्याप्रियो भवंति सरूपत्वा
य॥ ॥ परितस्थुष इत्याहेमेए वास्मै युनक्त्यभिजित्यै मरंत्यश्वमेधोरंधेरूपंजि
घ्रति त्रीणि च॥४॥ तेजसा वा एष ब्रह्मवर्चसेन व्यृध्यते। यो श्वमेधेन यजते। हो
ता च ब्रह्मा च ब्रह्मोद्यं वदतः। तेजसा चैवैनं ब्रह्मवर्चसेन च समर्धयतः। द
क्षिणतो ब्रह्मा भवति। दक्षिणत आयतनो वै ब्रह्मा। बार्हस्पत्यो वै ब्रह्मा। ब्रह्मव

र्चसमेवास्य दक्षिणतो दधाति। तस्माद्दक्षिणोऽर्धो ब्रह्मवर्चसितरः। उत्तरतो होता भ-
१०४॥ वति॥१॥ उत्तरत आयतनो वै होता। आग्नेयो वै होता। तेजो वा अग्निः। तेज एवास्यो-
त्तरतो दधाति। तस्मादुत्तरोऽर्धस्तेजस्वितरः। यूपमभितो वदतः। यजमानदेवत्यो
104 वै यूपः। यजमानमेव तेजसा च ब्रह्मवर्चसेन च समर्धयतः। किं स्विदासीत्पूर्व-
चित्तिरित्याह। द्यौर्वै वृष्टिः पूर्वचित्तिः॥२॥ दिवमेव वृष्टिमवरुन्धे। किं स्विदासीद्बृ-
हद्वय इत्याह। अश्वो वै बृहद्वयः। अश्वमेवावरुन्धे। किँ स्विदासीत्पिशंगिलेत्या-
ह। रात्रिर्वै पिशंगिला। रात्रिमेवावरुन्धे। किं स्विदासीत्पिलिप्पिलेत्याह। श्रीर्वै पि लिप्
लिप्पिला॥ अन्नाद्यमेवावरुन्धे॥३॥ कः स्विदेकाकी चरतीत्याह। असौ वा राम
आदित्य एकाकी चरति। तेज एवावरुन्धे। क उ स्विज्जायते पुनरित्याह। चंद्रमा १०४॥
वै जायते पुनः। आयुरेवावरुन्धे। किं [illegible] स्विद्धिमस्य भेषजमित्याह। अग्नि

वै हिमस्य भेषजं। ब्रह्मवर्चसमेवावरुंधे। किं स्विदावपनं महदित्याह॥ ४॥ अयं वै लो
क आवपनं महत्। अस्मिन्नेव लोके प्रतितिष्ठति। पृच्छामि त्वा परमंतं पृथिव्या
इत्याह। वेदिर्वै परोंतः पृथिव्याः। वेदिमेवावरुंधे। पृच्छामि त्वा भुवनस्य नाभि
मित्याह। यज्ञो वै भुवनस्य नाभिः। यज्ञमेवावरुंधे। पृच्छामि त्वा वृष्णो अश्वस्य
रेत इत्याह। सोमो वै वृष्णो अश्वस्य रेतः। सोमपीथमेवावरुंधे। पृच्छामि वाचः
परमं व्योमेत्याह। ब्रह्म वै वाचः परमं व्योम। ब्रह्मवर्चसमेवावरुंधे॥ ५॥ होता
भवति वेदबहिः पूर्वचित्तिरनाद्यमेवावरुंधे महदित्याह सोमो वै वृष्णो अश्वस्य
रेत अश्ववारिचा॥ ५॥ अप वा एतस्मात् प्राणाः क्रामंति। यो श्वमेधेन यजते।
प्राणाय स्वाहा व्यानाय स्वाहेति संज्ञप्यमान आहुतीर्जुहोति। प्राणानेवा

श्रा०स०
॥१०५॥
105

स्मिंदधाति। नास्मात्प्राणा अपक्रामंति। अवंतीस्थ। वंतीस्थ। वंतु। प्रियंत्वा प्रियाणां। वर्षि
ष्ठमाप्यानां। निधीनांत्वा निधिपतिं हवामहे वसो ममेत्याह। अपैवास्मैतध्नुते॥१॥
अथोधुवंत्येवैनं। अथो न्येवास्मै कुर्वते। त्रिः परियंति। त्रयइमे लोकाः। एभ्य एवै
नंलोकेभ्यो धुवते। त्रिः पुनः परियंति। षट्संपद्यंते। षड्वा ऋतवः। ऋतुभिरेवैनं
धुवते। अपवा एतेभ्यः प्राणाः क्रामंति॥२॥ ये यज्ञे धुवनं तन्वते। नव कृत्वः परि
यंति। नववै पुरुषे प्राणाः। प्राणानेवात्मंदधते। नैभ्यः प्राणा अपक्रामंति। अंबे
अंबाल्यंबिकइति पत्नीमुदानयति। अकृतैवैनां। सुभगे कांपीलवासिनीत्याह। राम
तपएवैनामुपनयति। सुवर्गे लोके संप्रोर्ण्वाथामित्याह॥३॥ सुवर्गमेवैनां लो ॥१०५॥

कंगमयति। आहमजानिगर्भध्यमात्वमजासिगर्भध्यमित्याह। प्रजावैपशवोगर्भः। प्र
जामेवपशूनात्मंधत्ते। देवावाअश्वमेधेपवमाने। सुवर्गंलोकंनप्राजानन्। तमश्वः
प्राजानात्। यत्सूचीभिरसिपथान्कल्पयंति। सुवर्गस्यलोकस्यप्रज्ञात्यै। गायत्रीत्रिष्टु
ब्जगतीत्याह।।४।।यथायजुरेवैतत्। त्रैय्यःसूच्योभवंति। अयस्मय्योरजताहरिण्यः।
अस्यवैलोकस्यरूपमयस्मय्यः। अंतरिक्षस्यरजताः। दिवोहरिण्यः। दिशोवाअय
स्मय्यः। अवांतरदिशारजताः। ऊर्ध्वाहरिण्यः। दिशएवास्मैकल्पयति। कस्त्वाछ्य
तिकस्त्वाविशास्तीत्याह। अहिंसायै।।५।।दैवतेकामंसूच्याइत्याह। जगतीसाहकल्प
यसेकंच।।६।।अपवाएतस्माद्राष्ट्रंक्रामति। योश्वमेधेनयजते। ऊर्ध्वामेना
मुच्छ्रयतादित्याह। श्रीर्वैराष्ट्रमश्वमेधः। श्रियमेवास्मैराष्ट्रमूर्ध्वमुच्छ्रयति। वेणुभारंगि

ब्रा०त्र०

॥१०६॥

106

राष्ट्रविवेत्याह। राष्ट्रं वै भारः। राष्ट्रमेवास्मै पर्यूहति। अथास्या मध्यमेधतामित्याह। श्रीर्वै राष्ट्रस्य म
ध्यं॥१॥ श्रियमेवावरुंधे। शीते वाते पुनन्निवेत्याह। क्षेमो वै राष्ट्रस्य शीतो वातः। क्षेममे
वावरुंधे। यद्धरिणी यवमत्तीत्याह। विड्वै हरिणी। राष्ट्रं यवः। विशं चैवास्मै राष्ट्रं च समी
ची दधाति। न पुष्टं पशु मन्यत इत्याह। तस्माद्राजा पशून्न पुष्यति॥२॥ शूद्रा यदर्यजारा
न पोषाय धनायतीत्याह। तस्माद्वैशीपुत्रं नाभिषिंचंते। इयं यका शकुंतिकेत्याह। विड्वै श
कुंतिका। राष्ट्रमश्वमेधः। विशं चैवास्मै राष्ट्रं च समीची दधाति। आहलमिति सर्प
तीत्याह। तस्माद्राष्ट्राय विशः सर्पंति। आहतं गभे पस इत्याह। विड्वै गभः॥३॥ राष्ट्रं प
सः। राष्ट्रमेव विश्याहंति। तस्माद्राष्ट्रं विशं घातुकं। माता च ते पिता च त इत्याह। इयं वै ॥१०६॥
माता। असौ पिता। आभ्यामेवैनं परिददाति। अग्रं वृक्षस्य रोहत इत्याह। श्री राम

वैरक्षस्याग्रं। श्रियमेवावरुंधे॥४॥प्रसुत्वामीति तेपिता गर्भे मुष्टिमतरं सयदि त्याह। विड्वै
गर्भः। राष्ट्रं मुष्टिः। राष्ट्रमेव विश्याहंति। तस्माद्राष्ट्रं विशं घातुकं। अपवाएते भ्यः प्राणाः क्रामं
ति। येयज्ञेपूतं वदंति। दधिक्राव्णो अकारिषमिति सुरभीमतीमृचं वदंति। प्राणावै ... सु
रभयः। प्राणानेवात्मं धत्ते। नैभ्यः प्राणा अपक्रामंति। आपो हिष्ठामयो भुव इत्यद्भि
र्मार्जयंते। आपोवै सर्वादेवताः। देवताभिरेवात्मानं पवयंते॥५॥ राष्ट्रस्य मध्यं पुष्याति ग
र्भोरुंधे। दधते च धारि च॥७॥ प्रजापतिः प्रजाः सृष्ट्वा प्रेणानुप्राविशत्। ताभ्यः पुनः संभ
वितुं नाशक्नोत्। सोब्रवीत्। ऋध्नवदित्सः। योमेतः पुनः संभवदिति। तं देवा अश्वमेधेन सम
भरन्। ततो वैत आर्ध्नुवन्। योश्वमेधेन यजते। प्रजापतिमेव संभरत्यृध्नोति। पुरुष
मालभते॥१॥ वैराजोवै पुरुषः। विराजमेवालभंते। अथो अन्नंवै विराड्। अन्न

मेवावरुंधे। अश्वमालभते। प्राजापत्योवा अश्वः। प्रजापतिमेवालभते। अथो श्रीर्वा एकश
फं। श्रियमेवावरुंधे। गामालभते॥२॥ यज्ञोवै गौः। यज्ञमेवालभते। अथो अन्नंवै गौः। अन्न
मेवावरुंधे। अजावी आलभते भूम्ने। अथो पुष्टिर्वै भूमा। पुष्टिमेवावरुंधे। पर्यग्निकृतं पुरु
षं चारण्यांश्चोत्सृजंत्यहिंसायै। उभौ वा एतौ पशू आलभ्येते। यश्चावमो यश्च परमः। तेस्यो
भये यज्ञे बद्धाः। अभीष्टा अभिप्रीताः। अभिजिता अभिहुता भवंति। नैनं दक्षिणावः प
शवो यज्ञे बद्धाः। अभीष्टा अभिप्रीताः। अभिजिता अभिहुता हिंसंति। योश्व
मेधेन यजते। यउचैनमेवं वेद॥३॥ लभते गामालभते परमो ष्टौ च॥८॥ प्रथमेन
वा एष स्तोमेन राध्वा। चतुष्टोमेन कृते नाजानामुत्तमे हन्। एकविंशं प्रतिष्ठायां
प्रतितिष्ठति। एकविंशात्प्रतिष्ठायाः ऋतून्न्वारोहति। ऋतवो वै पृष्ठानि। ऋतव

वः संवत्सरः। ऋतुष्वेव संवत्सरे प्रतितिष्ठाय। देवता अभ्यारोहति। शाक्वरः यः एषं भवं त्यन्यदन्य
च्छंदः। अन्येन्ये वा एते पशव आलभ्यंते। उतेव ग्राम्याः। उतेवारण्याः। अहरेव रूपेण सम
र्धयति। अथो अन्ह एवैष बलिर्ह्रियते। तदाहुः। अपशवो वा एते। यदजावयश्चारण्याश्च। एते वै स
र्वे पशवः। यद्गव्या इति। गव्यान्पशूनुत्तमेहन्नालभते ॥२॥ तेनैवोभयान्पशूनवरुंधे। प्राजापत्या
भवंति। अनभिजितस्याभिजित्यै। सौरीर्नव श्वेता वशा अनूबंध्या भवंति। अंतत एव ब्रह्मव
र्चसमवरुंधे। सोमाय स्वराज्ञे नोवाहावनड्वाहाविति इंद्विनः पशूनालभते। अहोरात्राणामभि
जित्यै। पशुभिर्वा एष व्यृध्यते। योश्वमेधेन यजते। छगलं कल्माषं किकिदीविं विदीगयमिति
त्वाष्ट्रान्पशूनालभते। पशुभिरेवात्मानं समर्धयति। ऋतुभिर्वा एष व्यृध्यते। योश्वमेधेन य
जते। पिशंगास्त्रयो वासंता इत्यृतुपशूनालभते। ऋतुभिरेवात्मानं समर्धयति। आवाए

षपशुभ्योऽवरुध्यते । योऽश्वमेधेन यजते । पर्यग्निकृतानाऽरण्यानुत्सृजन्त्यनावस्काय ॥३॥ लभ्यन्ते
लभन्ते वाऽश्वान्यश्वनालभन्ते नेष्टो च ॥७॥ प्रजापतिरकामयत महान्नादः स्यामिति
ति । स एतावश्वमेधे महिमानावपश्यत् । तावगृह्णीत । ततो वै स महानन्नादोऽभ
वत् । यः कामयेत महानन्नादः स्यामिति । स एतावश्वमेधे महिमानौ गृह्णीत । महा
नेवान्नादो भवति । यजमानं देवत्यावै वपा । राजा महिमा । यद्वपां महिम्नोभयतः प
रियजति । यजमानमेव राज्येनोभयतः परिगृह्णाति । पुरस्तात्स्वाहाकारा वा अन्ये देवाः ।
उपरिष्टात्स्वाहाकारा अन्ये । तेवा एते अश्वमेध्य उभये व रुध्यन्ते । यद्वपां महि ए म
म्नोभयतः परियजति । ताने वोभयान्प्रीणाति ॥१॥ परि यजति षट् ॥१०॥ वैश्व

देवो वा अश्वः। तं यत्प्राजापत्यं कुर्यात्। या देवता अपिभागाः। ता भागधेयेन व्य
र्धयेत्। देवताभ्यः समदं दध्यात्। स्रुगां द्वंद्वं शूर्पाभ्यां मंडूकांसंभ्येभि रिति। आऽस्य
मवदानं कृत्वा प्रति संख्याय माहुतीर्जुहोति। या एव देवता अपिभागाः।
ता भागधेयेन समर्धयति। न देवताभ्यः समदं दधाति॥१॥ चतुर्दशैतानतुवा
कान्जुहोति संवत्सरीयो। प्रयासाय स्वाहेति पंचदश। पंचदश वा अर्धमासस्य रात्रयः। अर्धमासशः संवत्स
र आप्यते। देवासुराः संयत्ता आसन्। ते सुवर्गन्न यन्तः स्विष्टकृतः। अश्वस्य मे
धस्य मेध्यस्य वयमुद्धारमुद्धरामहे। अथैतानभिप्रवीमेति। ते लोहितमुदहर
न्। ततो देवा अभवन्॥२॥ परासुराः। यत्स्विष्टकृद्भ्यो लोहितं जुहोति भ्रातृव्या
भिभूत्यै। भवत्यात्मना। परास्य भ्रातृव्यो भवति। गोमृगकंठेन प्रथमामाहुतिं

ब्रा॰ ह॰

जुहोति। पशवो वै गोमृगः। रुद्रोग्निस्विष्टकृत्। रुद्रादेव पशूनेतद्धाति। अथो यत्रैषाहुतिर्हूयते।
॥१०९॥ न तत्र रुद्रः पशूनभिमन्यते॥३॥ अश्वशफेन द्वितीयामाहुतिं जुहोति। पशवो वा एकशफं रु
109 द्रोग्निस्विष्टकृत्। रुद्रादेव पशूनेतद्धाति। अथो यत्रैषाहुतिर्हूयते। न तत्र रुद्रः पशूनभिमन्य
ते। अयस्मयेन कमंडलुनात्ऋतीयां। आहुतीं जुहोस्यायास्यो वै प्रजाः। रुद्रोग्निस्विष्टकृत्। रु
द्रादेव प्रजा अन्तर्दधाति। अथो यत्रैषाहुतिर्हूयते। न तत्र रुद्रः प्रजा अभिमन्यते॥४॥ द
धाय्या एव न्यान्यते प्रजा अंतर्दधाति द्वे वा॥१४॥ अश्वस्यवा आलब्धस्य मेध उदक्रामत्। तदश्व
स्तोमीयमभवत्। यदश्वस्तोमीयं जुहोति। स्वमेधमेवेन मालभते। आज्येन जुहोति।
मेधो वा आज्यं। मेधोश्वस्तोमीयं। मेध एवैवास्मिं मेधं दधाति। षट्त्रिंशतं जुहोति। षट्त्रिं ॥१०९॥
शद्दक्षरा बृहती॥१॥ बार्हताः पशवः। सा पशूनां मात्रा। पशूनेव मात्रया समर्धयति। ना
यदूपसीं वा कनीयसीं वा जुहुयात्। पशून्मात्रया व्यर्धयेत्। षट्त्रिंशतं जुहोति। षट्त्रिंशा

दक्षरा बृहती। बार्हताः पशवः। पशवस्त्रोमान्तरात्रा। पशूनेवमात्रया समर्धयति ॥२॥ अश्वस्तोमीय
ं हुत्वा द्विपदा अनुहोति। द्विपाद्वै पुरुषो द्विप्रतिष्ठः। तदेनं प्रतिष्ठया समर्धयति। तदाहुः। अश्व
स्तोमीयं पूर्वं होतव्यां ३ द्विपदा ३ इति। अश्वो वा अश्वस्तोमीयं पुरुषो द्विपदाः। अश्वस्तो
मीयं हुत्वा द्विपदा अनुहोति। तस्माद्द्विपाच्चतुष्पादमत्ति। अथो द्विपद्येव चतुष्पदः प्रतिष्ठाप
यति। द्विपदा हुत्वा। नान्यामुत्तरामाहुतिं जुहुयात्। यदन्यामुत्तरामाहुतिं जुहुयात्। प्र
प्रतिष्ठाया श्च्यवेत। द्विपदा अन्ततो जुहोति प्रतिष्ठित्यै ॥३॥ बृहत्स्यर्धयतिस्थापयति
पंचच ॥१२॥ प्रजापतिरश्वमेधमसृजत। सोऽस्मात्सृष्टोऽपाक्रामत्। तं यज्ञक्र
तुभिरन्वैच्छत्। तं यज्ञक्रतुभिर्नान्वविंदत्। तमिष्टिभिरन्वैच्छत्। तमिष्टिभिर
न्वविंदत्। तदिष्टीनामिष्टित्वं। पत्संन्सरमिष्टिभिर्यजते। अश्वमेव तन्विच
दे।

नि। सावित्रियो भवंति ॥१॥ इयं वै सविता। यो वा अस्यां न रमते यो निलयते। अस्यां वाव तं विंद
ति। न वा इमां कश्चनेत्याहुः। तिर्यङ्ङ् पर्यावर्तितुमर्हतीति। यत्सावित्रियो भवंति। सत्व प्रसूत
त एवैनमिछति। ईश्वरो वा अश्वः प्रमुक्तः परां परावतं गंतोः। यत्सायं धृतीर्जुहोति। अश्व
स्य यत्यै धृत्यै। यत्प्रातरिष्टिभिर्यजते। अश्वमेव तदन्विच्छति। यत्सायं धृतीर्जुहोति।
अश्वस्यैव यत्यै धृत्यै। तस्मात्सायं प्रजाः क्षेम्या भवंति। यत्प्रातरिष्टिभिर्यजते। अश्वमेव त
दन्विच्छति। तस्माद्दिवा नष्टैषएति। यत्प्रातरिष्टिभिर्यजते सायं धृतीर्जुहोति। अहोरा
त्राभ्यामेवैनमन्विच्छति। अथो अहोरात्राभ्यामेवास्मै योगक्षेमं कल्पयति ॥२॥ भवं
ति धृत्या एनमन्विच्छत्येकं च ॥१३॥ अप वा एतस्माच्छ्रीराष्ट्रं क्रामति। यो श्वमेधे
न यजते। ब्राह्मणौ वीणागाथिनौ गायतः ॥ श्रिया वा एतद्रूपं। यद्वीणा ॥ श्रियमेवास्मि
त्तद्धतः। यदा खलु वै पुरुषः श्रियमश्नुते ॥ वीणास्मै वाद्यते। तदाहुः। यदुभौ ब्राह्मणौ

गायेतां ॥१॥ अपास्माच्छ्रीः क्रामेत् ॥ न वै ब्राह्मणे श्री रमत इति ॥ ब्राह्मणोन्यो गा
येत् ॥ राजन्योन्यः ॥ ब्रह्म वै ब्राह्मणः ॥ क्षत्रं राजन्यः ॥ तथा हास्य ब्रह्मणा च क्षत्रेण
चोभयतः श्रीः परिगृहीता भवति ॥ तदाहुः ॥ यदुभौ दिवा गायेतां ॥ अपास्माद्राष्ट्रं
क्रामेत् ॥२॥ न वै ब्राह्मणे राष्ट्रं रमत इति ॥ यदा खलु वै राजा कामयते ॥ अथ
ब्राह्मणं जिनाति ॥ दिवा ब्राह्मणो गायेत् ॥ नक्तं राजन्यः ॥ ब्राह्मणो वै रूपमहः
क्षत्रस्य रात्रिः ॥ तथा हास्य ब्रह्मणा च क्षत्रेण चोभयतो राष्ट्रं परिगृहीतं भ
वति ॥ इत्यददा इत्ययजथा इत्यपच इति ब्राह्मणो गायेत् ॥ इष्टापूर्त्तं वै
ब्राह्मणस्य ॥३॥ इष्टापूर्त्तेनैवैनं समर्धयति । इत्यजिना इत्ययुध्यथा इत्यमुं संग्राम
महन्निति राजन्यः । युद्धं वै राजन्यस्य । युद्धेनैवैनं समर्धयति । अक्रतावा एतस्यर्त्तव इत्याहुः ॥ यो
श्वमेधेन यजत इति । तिस्रोन्यो गायति तिस्रोन्यः । षट् संपद्यन्ते । षड्वा ऋतवः । ऋतूनेवास्मै क

श्रौ०सू०

॥१११॥ ल्पयतः। ताभ्यां संस्थायां। अनोयुक्ते च शते च ददाति। शतायुः पुरुषः शतेंद्रियः। आयुष्येवेंद्रियेप्र
तितिष्ठति॥४॥ गायेतां कामेष्वाह्न स्यक्लृप्यत चत्वारि च॥१४॥ सर्वेषु वा एषु लोकेषु मृत्यवो
॥। न्वायत्ताः। तेभ्यो यदाहुतीर्न जुहुयात्। लोके लोक एनं मृत्युर्विंदेत्। मृत्यवे स्वाहा मृत्यवे स्वा
हेत्यभिपर्वमाहुतीर्जुहोति। लोकाल्लोकादेव मृत्युमवयजते। नैनं लोके लोके मृत्युर्विंदति।
यदमुष्मै स्वाहामुष्मै स्वाहेति जुहुयात् संचक्षीत। बहुं मृत्युममित्रं कुर्वीत। मृत्यवे स्वाहेत्येकस्मा एवै
कां जुहुयात्। एको वा अमुष्मिंल्लोके मृत्युः॥१॥ अशनया मृत्युरेव। तमेवामुष्मिंल्लोकेवयजते।
भ्रूणहत्यायै स्वाहेत्यवभृथ आहुतिं जुहोति। भ्रूणहत्यामेवावयजते। तदाहुः। यद्भ्रूणह ॥१११॥
त्यापाप्याथ। कस्माद्यज्ञेपि क्रियत इति। अमृत्युर्वा अ[illegible]न्यो भ्रूणहत्याया इत्याहुः। भ्रू
णहत्या वाव मृत्युरिति। यद्भ्रूणहत्यायै स्वाहेत्यवभृथ आहुतिं जुहोति। २। मृत्युमेवाहु

त्या तर्पयित्वा परिपाणं कृत्वा। भ्रूणघ्ने भेषजं करोति। एतां ह वै मुण्डिभ औदन्यवः। भ्रूणहत्या
यै प्रायश्चित्तिं विदां चकार। यो ह्यस्यापि प्रजायां ब्राह्मणं हन्ति। सर्वस्मा एतस्मै भेषजं करो
ति। जुंबकाय स्वाहेत्यवभृथ उत्तमामाहुतिं जुहोति। वरुणो वै जुंबकः। अंतत एव वर
णमवयजते। खलतेर्विक्लिधस्य शुक्लस्य पिंगाक्षं जुहोति। × स्यमर्धं × एतद्वै वरुण
स्य रूपं। रूपेणैव वरुणमवयजते। ॥३॥ लोके मृत्युं जुहोति मूर्धं जुहोति द्वे च ॥१५॥ वा
रुणो वा अश्वः। तं देवतया समर्धयति। यत्प्राजापत्यं करोति। नमो राज्ञे नमो वरुणायेत्या
ह। वारुणो वा अश्वः। स्वयैवैनं देवतया समर्धयति। नमोऽश्वाय नमः प्रजापतय इत्या
ह। प्राजापत्यो वा अश्वः। स्वयैवैनं देवतया समर्धयति। नमोऽधिपतय इत्याह ॥१॥
धर्मो वा अधिपतिः। धर्ममेवावरुंधे। अधिपतिरस्यधिपतिं मा कुर्वधिपतिरहं प्र

श्री०त०
॥११२॥

जानां स्यामित्याह। अधिपतिमेवैनं समानानां करोति। मां धेहि मयि धेहीत्याह। आ
शिषमेवैतामाशास्ते। उपाकृताय स्वाहेत्युपाकृते जुहोति। आलब्धाय स्वाहेति नियुक्ते जुहोति।
हुताय स्वाहेति हुते जुहोति। एषां लोकानामभिजित्यै॥२॥ प्र वा एष एभ्यो लोकेभ्यश्च्यवते।
यो ऽश्वमेधेन यजते। आग्नेयमैन्द्राग्नमाश्विनं। तान्पशूनालभते प्रतिष्ठित्यै। यदाग्नेयो भ
वति। अग्निः सर्वा देवताः। देवता एवावरुंधे। ब्रह्म वा अग्निः। क्षत्रमिंद्रः। यदैन्द्राग्नो भवति॥३॥
ब्रह्मक्षत्रे एवावरुंधे। यदाश्विनो भवति। आशिषमेवावरुंधे। त्रयो भवंति। त्रय इमे लोकाः।
एष्वेव लोकेषु प्रतितिष्ठति। अग्नये ऽंहोमुचे ऽष्टाकपाल इत्येद्दशहविषमिष्टिं निर्वपति। दशा
क्षरा विराट्। अन्नं विराट्। विराजैवान्नाद्यमवरुंधे। अग्ने मन्वे प्रथमस्य प्रचेतस इत्या
ज्यानुवाक्या भवंति सर्वत्वाय॥४॥ अधिपतय इत्याहाभिजित्या ऐन्द्राग्नो भवति रुध

॥११२॥

एकं च ॥ १६ ॥ यद्यश्वमुपतापो विन्देत् । आग्नेयमष्टाकपालं निर्वपेत् । सौम्यं चरुं । सावित्रम
ष्टाकपालं । यदाग्नेयो भवति । अग्निः सर्वा देवताः । देवताभिरेवैनं भिषज्यति । यत्सौम्यो भ
वति । सोमो वा ओषधीनाᳪं राजा । याभ्य एवैनं विदत्ति ॥ १ ॥ ताभिरेवैनं भिषज्यति । यत्सा
वित्रो भवति । सवितृप्रसूत एवैनं भिषज्यति । एताभिरेवैनं देवताभिर्भिषज्यति । अग
दो हैव भवति । पौष्णं चरुं निर्वपेत् । यदि श्लोणः स्यात् । पूषा वै श्लोणस्य भिषक् । स ए
वैनं भिषज्यति । अश्लोणो हैव भवति ॥ २ ॥ रौद्रं चरुं निर्वपेत् । यदि महती देवताभिम
न्येत । एतद्देवत्यो वा अश्वः । स्वयैवैनं देवतया भिषज्यति । अगदो हैव भवति । वैश्वा
नरं द्वादशकपालं निर्वपेन्मृगाख्यरे यदि नागच्छेत् । इयं वा अग्निर्वैश्वानरः । इयमेवै
नमर्चिष्यां परिराध्यमानयति । आलेव सुत्यमहर्गच्छति । यद्यधीयात् ॥ ३ ॥

अग्नयेऽंहोमुचेऽष्टाकपालः। सौर्यं पयः। वायव्य आज्यभागः। यजमानो वा अश्वः। अं
हसा वा एष गृहीतः। यस्याश्वो मेध्यायप्रोक्षितो म्रियते। यदग्नयेऽंहोमुचे निर्वपति। अंहस
एवैनं मुञ्चते। यजमानो वा अश्वः। रसेन सा वा एष व्यृध्यते॥ [illegible] ॥ यस्याश्वो मेध्यायप्रो
क्षितो म्रियते। सौर्यं रेतः। यत्सौर्यं पयो भवति। रेत एवैनं समर्धयति। यजमानो
वा अश्वः। गर्भैर्वा एष व्यृध्यते। यस्याश्वो मेध्यायप्रोक्षितो म्रियते। वायव्या गर्भाः।
यद्वायव्य आज्यभागो भवति। गर्भैरेवैनं समर्धयति। अथो वायव्यैषा अश्वमेधे
प्रायश्चित्तिः क्रियते। इष्टावसीयान्भवति॥ ५॥ विंदत्य भ्रूणो पो हैव मत्स्य धीयाद
ध्यातेग मैरेवैनं समर्धयति ह्वे च॥ १७॥ तदाहुः। द्वादश ब्रह्मौदनान्सं
स्थिते निर्वपेत्। द्वादशभिर्वेष्टिभिर्यजेतेति। यदिष्टिभिर्यजेत। उपनामुक ए ॥११३॥

नेयस्यात्। पापीयाꣳस्तुस्यात्। आसानि वाएतस्यछंदाꣳसि। यईजानः। तानिकृएताव
दाश्रुत्तुनः प्रयुंजीतेति। सर्वाः वैसꣳस्थिते यज्ञे वागाप्यते॥१॥सासाभवतियातया
म्नी। कृशीत्तेव हि भवत्ययज्ञतां। सानपुनः प्रयुज्येत्याहुः। द्वादशैवब्रह्मौदना सꣳ
स्थिते निर्वपेत्। प्रजापतिर्वाओदनः। यज्ञः प्रजापतिः। उपनामुकएनंयज्ञो भ
वति। नपापीयान्भवति। द्वादश भवंति। द्वादशमासाः संवत्सरः। संवत्सरएव प्र
तितिष्ठति॥२॥आप्ताेसंवत्सरएकं च॥१८॥८ एषवैविभूर्नामयज्ञः। सर्वꣳह
वैतत्रविभुर्भवति। यत्रैतेन यज्ञेनयजंते। एषवैप्रभूर्नामयज्ञः। सर्वꣳहवैतत्र
प्रभुर्भवति। यत्रैतेनयज्ञेनयजंते। एष वाऊर्जस्वान्नामयज्ञः। सर्वꣳहवै तत्रोर्जस्व
द्भवति। यत्रैतेनयज्ञेनयजंते। एषवैपयस्वान्नामयज्ञः॥१॥सर्वꣳहवैतत्रपयस्व

ब्रा०स०

।।११४।। द्भवति। यत्रैतेनयज्ञेनयजंते। एषवैविधृतोनामयज्ञः। सर्वं ह वैतत्रविधृतंभवति।

115 यत्रैतेनयज्ञेनयजंते। एषवैव्यावृत्तोनामयज्ञः। सर्वं ह वैतत्रव्यावृत्तंभवति। य

त्रैतेनयज्ञेनयजंते। एषवैप्रतिष्ठितानामयज्ञः। सर्वं ह वैतत्रप्रतिष्ठितंभवति।

।।२।। यत्रैतेनयज्ञेनयजंते। एषवैतेजस्वीनामयज्ञः। सर्वं ह वैतत्रतेजस्विभव

ति। यत्रैतेनयज्ञेनयजंते। एषवैब्रह्मवर्चसीनामयज्ञः। आह वैतत्रब्राह्मणोब्र

ह्मवर्चसीजायते। यत्रैतेनयज्ञेनयजंते। एषवाअतिव्याधीनामयज्ञः। आहवै

तत्रराजन्योतिव्याधीजायते। यत्रैतेनयज्ञेनयजंते। एषवैदीर्घोनामयज्ञः। दी

र्घायुषो ह वैतत्रमनुष्याभवंति। यत्रैतेनयज्ञेनयजंते। एषवैकॢप्तोनामयज्ञः। कॢप्त

ते ह वैतत्रप्रजाभ्योयोगक्षेमः। यत्रैतेनयज्ञेनयजंते।।३।। पयस्वांनामयज्ञः प्रति ।।११५।।

ष्ठितं भवति व्याघ्री जायते यत्रैतेन यज्ञेन यजंते षड्॥ ११॥ बिल्वः प्रत्नस्य सुवर्गस्था
स्यान्यस्मान्विल्वस्ततो ब्राह्मणः प्रतिष्ठितस्तेजस्वी ब्रह्मवर्चस्यतिव्याधी
दीर्घः कुसीदो द्वादश॥ तार्प्येणाश्वं संज्ञपयंति। यज्ञो वै तार्प्यं॥ यज्ञेनैवै
नं समर्धयंति। यामेन साम्ना प्रस्तोतानूपतिष्ठते। यमलोकमेवैनं गमय
ति। तार्प्ये वलकस्य पीवासे चाश्वं संज्ञपयंति। एतद्वै पुरुषस्य रूपं। रूपेणै
व पशूनवरुंधे। हिरण्यकशिपु भवति। तेजसोवरुध्यै॥ १॥ रुक्मो भवति।
सुवर्गस्य लोकस्यानुख्यात्यै। अश्वो भवति। प्रजापतेराप्त्यै। अस्य
वैलोकस्य रूपं तार्प्यं॥ अंतरिक्षस्य कृशपीवासः। द्यौर्हिरण्यकशि
पु। आदित्यस्य रुक्मः। प्रजापतेरश्वः। इममेव लोकं तार्प्येणाप्नो

श्री०त्र०

॥११५॥ ति। अंतरिक्षं सत्यपीवासेन। दिवᳫं हिरण्यकशिना। आदित्यᳫं रुक्मेण। अश्वेनैव मे

115 ध्येन प्रजापतेः सायुज्यं सलोकतामाप्नोति। एतासामेव देवतानाᳫं सायुज्यं। सार्ष्टि

ताᳫं समानलोकतामाप्नोति। योश्वमेधेन यजते। यउ चैनमेवं वेद॥१९॥ अवरु

ध्या आप्नोत्येष्टो च॥२०॥ आदित्याश्चांगिरसश्च सुवर्गे लोकेस्पर्धंत। तेंगिरस

आदित्येभ्यः। अमुमादित्यमश्वᳫं श्वेतं भूतं दक्षिणामनयन्। तेब्रुवन्। यंनो

नेष्ट। स वर्यो भूदिति। तस्मादश्वᳫं सवर्येत्याह्वयंति। तस्माद्यज्ञे वरो दीयते। य

त्प्रजापतिरालब्धो श्वोभवत्। तस्मादश्वो नम॥२१॥ यच्छ्वयदरुरासीत्। तस्मा

दर्वा नाम। यत्सद्यो वाजान्समजयत्। तस्माद्वाजी नाम। यदसुराणां लोकानाद

त्त। तस्मादादित्यो नाम। अग्निर्वा अश्वमेधस्य योनिरायतनं। सूर्योग्नेर्योनिरायतनं। य ॥११५॥

दश्वमेधेग्नौ चित्यमुत्तवेदिमुपवपति। योऽत्र तमेवैनमायतनवन्तं करोति॥२॥ यो निमाना
यतनवान्भवति। यएवंवेद। प्राणापानौ वा एतौ देवानां। यदर्कोश्वमेधो। प्राणापानावेवा
वरुंधे। ओजोबलं वा एतौ देवानां। यदर्कोश्वमेधो। ओजोबलमेवावरुंधे। अग्नि
र्वा अश्वमेधस्य योनिरायतनं। सूर्योऽग्नेर्योनिरायतनं। यदश्वमेधेग्नौ चित्यमुत्त
रवेदिं चिनोति। तावर्कोश्वमेधौ। अर्कोश्वमेधावेवावरुंधे। अथो अर्कोश्वमेधयो
रेव प्रतितिष्ठति॥३॥ नामकरोति सूर्योग्नेर्योनिरायतनं चत्वारि च॥२१॥ प्रजाप
तिं वै देवाः पितरः पशुं भूतं मेध्यायालभंत। तमालभ्योपावसन्। प्रातर्यष्टास्म
ह इति। एवं वा एतद्देवानामहः। यत्संवत्सरः। तस्मादश्वः पुरस्तात्संवत्सर आलभ्य
ते। यत्प्रजापतिरालब्धो ऽश्वो ऽभवत्। तस्मादश्वः। यत्सद्यो मेध्यो ऽभवत्॥१॥ तस्माद

ब्रा०ष०
॥११६॥
॥६

श्वमेधः। वेदुको श्वस्याश्चुं भवति। य एवं वेद। यद्वेनस्य गा परिरालब्धो श्वो भवतु। तस्मा
दश्वः प्रजापतेः पशूनामनुरूपतमः। आस्य पुत्रः प्रतिरूपो जायते। य एवं वेद। सर्वा
णि भूतानि संस्पृत्यालभन्ते। समेनं देवा सोऽजसेवन्त्रश्व चेस्यायभूति। यो श्वमेधे
न यजते। ॥२॥ यउ चैनमेवं वेद। एतद्वै तद्देवाए तांदेवतां। पशुं भूतमेध्या पाल
भंत। यज्ञमेव। यज्ञेन यज्ञमयजंत देवाः। कामप्रं यज्ञमकुर्वत। तम्रत्त त्वसकायंत।
तेम्रत्त त्वमगच्छन्। यो श्वमेधे न यजते। देवानामेवायनेनेति ॥३॥ प्राजाप
त्यैनैव यज्ञेन यजते कामप्रेणै। अपुनर्मारमेव गच्छति। एतस्य वै रूपेण पुरस्ता
त्प्राजापत्यम्रृषभं तूपरं बहुरूपमालभन्ते। सर्वेभ्यः कामेभ्यः। सर्व[illegible]स्या
प्त्यै। सर्वस्याजित्यै। सर्वमेवतेनाप्नोति। सर्वं जयति। यो श्वमेधेन यजते। य ॥१२६॥

ऽचैनमेवं वेद॥७॥ मेध्यो भवत्यजन्तु एति य वेद। यो वा अश्वस्य मेध्यस्य लोमनी वे
द। अश्वस्यैव मेध्यस्य लोमं लोमं जुहोति। अहोरात्रे वा अश्वस्य मेध्यस्य लोमनी।
यत्सायं प्रातर्जुहोति। अश्वस्यैव मेध्यस्य लोमं लोमं जुहोति। एतदनु ह स्माति ह स्म वे
पुरा। अश्वस्य मेध्यस्य लोमं लोमं जुहुति। यो वा अश्वस्य मेध्यस्य पदे वेद। अश्व
स्यैव मेध्यस्य पदे पदे जुहोति। दर्शपूर्णमासौ वा अश्वस्य मेध्यस्य पदे॥१॥ यद्दर्शपू
र्णमासौ यजते। अश्वस्यैव मेध्यस्य पदे पदे जुहोति। एतदनु स्तति ह स्मवे पुरा। अश्व
स्य मेध्यस्य पदे पदे जुहुति। यो वा अश्वस्य मेध्यस्य विवर्त्तनं वेद। अश्वस्यैव मेध्यस्य विव स्या
र्त्तने विवर्त्तने जुहोति। असौ वा आदित्यो श्वः। स आहवनीयमागच्छति। तद्विवर्त्ते लाय
दग्निहोत्रं जुहोति। अश्वस्यैव मेध्यस्य विवर्त्तने विवर्त्तने जुहोति। एतदनु स्तति ह

ब्रा०त०

॥११७॥ सावेधुरा। अश्वस्य मेध्यस्य विवर्त्त नेविवर्त नेजुहति॥२॥ पदेअग्नि होत्रंजु होतित्रीणि
व॥२३॥ प्रजापतिसामषोडशिभिः प्रजापतिरकामयतोभावस्त्रे युंजंति तेजसापप्रा
णा अपश्रीरक्ष्योर्प्रजापतिः प्राणानु प्रथमेन प्रजापतिरकामयतेम हान्वैश्वदेवोवा
अश्वस्यप्रजापतिसंतयज्ञक्रतुभिरपश्री श्रींत्प्राणो सर्वेभुवारुणोयद्यश्वं तदाहरे
षवैविस्रस्तार्थेणादित्याः प्रजापतिं पितरं येवाअश्वस्यमेध्यस्यलोमनीत्रेयो
विरंज्ञातिः॥२३॥ ॥प्रजापतिरस्मिंलोकउत्तरतः श्रियमेवावप्रजापतिरकामय
तमहान्यथ्यातः प्रवाएषस्य [illegible] ध्यः सर्वं हवै तत्रयउ चैनमेवं वेद चतुरशी
तिः॥८४॥३०॥ ॥ संज्ञानंविज्ञानंप्रज्ञानंजानदभिजानत्। संकल्पमानं
प्रकल्पमानमुपकल्पमानमुपक्लृप्तं क्लृप्तं। श्रेयोवसीयआयत्संभूतंभूतं। चि ॥११७॥

त्रः केतुः प्रभाना भान्त्संभान्। ज्योतिष्माꣳस्तेजस्वानातपꣳस्तपन्नभितपन्। रोचनो रोच
मानः शोभनः शोभमानः कल्याणः। दर्शा दृष्टा दर्शता विश्वरूपा सुदर्शना। आ
प्यायमाना प्यायमाना प्याया सूनृतेरा। आपूर्यमाणा पूर्यमाणा पूरयंती पूर्णा पौर्ण
मासी। दाता प्रदातानंदो मोदः प्रमोदः॥ १॥ आवेशयंनिवेशयन्त्संवेशनः संशांतः
शांतः। आभवन्प्रभवन्त्संभवन्त्संभूतो भूतः। प्रस्तुतं विष्टुतꣳ संस्तुतं कल्याणं विश्वरू
पं। शुक्रममृतं तेजस्वि तेजः समिद्धं। अरुणं भानुमन्मरीचिमदभितपत्तपस्वत्॥
सविता प्रसविता दीप्तो दीपयन्दीप्यमानः। ज्वलं ज्वलिता तपन्वितपन्त्संतपन्। रो
चनो रोचमानः शुंभूः शुंभमानो वामः। सुता सुन्वती प्र[illegible]ता सूयमानाभिषू
यमाणा॥ पीती प्रपा संपा तृप्तिस्तर्पयंती॥ २॥ कांता काम्या कामजातायुष्मती

कामदुघा। अभिशस्तानुमंतानं देमोदः प्रमोदः॥ आसीयं निषाद पन्नसंस्पादनः सं सनः स
नः। आमूर्विं स्पृः प्रस्पृः शं स्पृशं भुवः। पवित्रे पवयिष्यन्पूतो मेध्यः। यशो पेशस्वानायुरमृतः।
जीवो जीविष्यन्स्वर्गो लोकः। सहस्वान्सहीयानोजस्वान्ससहमानः। जयन्नभिजयन्सु
द्रविणो द्रविणोदाः ४। आर्द्रपवित्रो हरिकेशो मोदः प्रमोदः॥ ३॥ अरुणोरुणरजाः
पुंडरीको विश्वजिदभिजित्॥ आर्द्रः पिन्वमानोन्नवान्त्रसवानिरावान्सर्वौषधः सं
भरो महस्वान्। एजत्को जोवत्काः क्षुल्लकाः शिपिविष्टकाः। सारिस्वराः सक्षोरवः। अ
जिरासो गमिष्ठवः। इदानीं तदानीमेतर्हि क्षिप्रमजिरं। आशुर्निमेषः फणोद्रव
न्नतिद्रवन्त्वरंस्त्वरमाण आशुराशीयांजवः। अग्निष्टोम उक्थ्यातिरात्रो द्वि
रात्रस्त्रिरात्रश्चतूरात्रः। अग्निर्ऋतुः सूर्य ऋतुश्चंद्रमा ऋतुः। प्रजापतिः संवत्सरो म

ह्रान्कः ॥४॥ प्रमोदस्तर्पयंतीप्रमोदोजवर्ख्रीणिचा॥१॥भूरग्निंचपृथिवीचमांचा त्रीणश्चत्लो
कान्संवत्सरंचा प्रजापतिस्त्वासादत्तु। तयादेवतयांगिरस्वध्रुवासीदा भुवोवायुंचांतरिक्षं
चमांचा त्रीणश्चत्लोकान्संवत्सरंचा प्रजापतिस्त्वासादत्तु। तयादेवतयांगिरस्वध्रुवासी
दा स्वरादित्यंचदिवंचमांचा त्रीणश्चत्लोकान्संवत्सरंचा प्रजापतिस्त्वासादत्तु। तयादेव
तयांगिरस्वध्रुवासीदा भुर्भुवस्वश्चंद्रमसंचदिशश्चमांचा त्रीणश्चत्लोकान्संवत्सरं
चा प्रजापतिस्त्वासादत्तु। तयादेवतयांगिरस्वध्रुवासीद॥१॥ संवत्सरंचषड्॥२॥
त्वमेवत्वांवेत्थयोसिसोसि त्वमेववामचेषीः। चितश्चासिसंचितश्चास्यग्ने। एतावा
ंश्चासिभूयांश्चास्यग्ने। यत्तेअग्नेन्यूनं यदुतेतिरिक्तं। आदित्यास्तदंगिरसश्चिन्वं
तु। विश्वेदेवाश्चितिमापूरयंतु। चितश्चासिसंचितश्चास्यग्ने। एतावांश्चासिभू

ते०

श्री

ब्रा॰ त्र॰

॥११७॥ याꣳश्चास्यग्ने। मा ते अग्ने चयेन मा ति चयेनायुरादक्षि॥१॥ सर्वेषां ज्योतिषां ज्योतिर्यदुदा
चुदेति। तपसो जातमनिभृष्टमोजः। तत्ते ज्योतिरिष्टके। तेन मे तप। तेन मे ज्वल। तेन

११९ मे दीदिहि। यावद्देवाः। यावदसाति सूर्यः। यावदुतापि ब्रह्म॥२॥ आरक्षिनवच॥३॥
संवत्सरोसि परिवत्सरोसि। इदावत्सरोसि। इदुवत्सरोसि। इद्वत्सरोसि। वत्सरोसि। तस्य
ते वसन्तः शिरः। ग्रीष्मो दक्षिणः पक्षः। वर्षा पुच्छं। शरदुत्तरः पक्षः। हेमन्तो मध्यं। पू
र्वपक्षाश्चितयः। अपरपक्षाः पुरीषं॥१॥ अहोरात्राणीष्टकाः। ऋषभोसि स्व
र्गो लोकः। यस्यां दिशि महीयसे। ततो नो मह आवह। वायुर्भूत्वा सर्वा दिश आवा
हि। सर्वा दिशोनुविवाहि। सर्वा दिशोनु संवाहि। चित्या चितिमापृण। अचित्या
चितिमापृण॥ चिदसि समुद्रयोनिः॥२॥ इन्दुर्दक्षः श्येन ऋतावा। हिरण्यपक्षः ॥११९॥

शाकुनोभुरण्युः। महान्सधस्थेध्रुवआनिषत्तः। नमस्तेअस्तुमामाहिंसीः। एति
प्रेति वीतिसमित्युदिति। दिवंमेयच्छ। अंतरिक्षंमेयच्छ। पृथिवींमेयच्छ। पृथिवीं
मेयच्छ। अंतरिक्षंमेयच्छ। दिवंमेयच्छ। अह्नाप्रसारय। रात्र्यासमंच। रात्र्याप्र
सारय। अह्नासमंच। कामंप्रसारय। कामंसमंच॥ ३॥ पुरीष्यस्समुद्रयोनिः
पृथिवींमेयच्छांतरिक्षंमेयच्छसमंच॥ ४॥ भुर्भुवस्स्वः। ओजोबलं। ब्रह्मक्षत्रं।
यशोमहत्। सत्यंतपोनाम। रूपममृतं। चक्षुश्श्रोत्रं। मनः आयुः। विश्वंयशो
महः। समंतपोहरोभाः। जातवेदायदिवापावकोसि। वैश्वानरोयदि
वावैद्युतोसि। शंप्रजाभ्योयजमानायलोकं। ऊर्जंपुष्टिंददभ्यावहस्व॥ १॥
भाष्यं वारिचा॥ ५॥ राज्ञीविराज्ञी। सम्राज्ञीस्वराज्ञी। अर्चिः शोचिः। तपोह

शु०य०

।।११२०।।

120

रो भाः। अग्निरिंद्रो बृहस्पतिः विश्वेदेवा भुवनस्य गोपाः। ते मा सर्वे यशसा संसृजंतु।।१।।
राज्ञी द्वे मासस्य।।६।। असवे स्वाहा वसवे स्वाहा विभुवे स्वाहा विवस्वते स्वाहा अभिभुवे
स्वाहाधिपतये स्वाहा। दिवांपतये स्वाहा ऽंहसस्पत्याय स्वाहा। चाक्षुष्मत्याय स्वा
हा ज्योतिष्मत्याय स्वाहा। राज्ञे स्वाहा विराज्ञे स्वाहा। संराज्ञे स्वाहा स्वाराज्ञे स्वराज्ञे
स्वाहा। भूषाय स्वाहा सूर्याय स्वाहा। चंद्रमसे स्वाहा ज्योतिषे स्वाहा। संसर्पा
य स्वाहा कल्याणाय स्वाहा। अर्जुनाय स्वाहा।।१।। कल्याणाय स्वाहेकं च।।७।।
विपश्चिते पवमानाय गायत। मही न धारात्यंधो अर्षति। अहिर्न जूर्णामति
सर्पति त्वचं। अत्यो न क्रीडंन्नसरद्वृषा हरिः। उपयामगृहीतोसि मृत्यवे त्वा जु
ष्टं गृह्णामि। एष ते योनिर्मृत्यवे त्वा। अपमृत्युमप क्षुधं। अपेतः शपथं जहि। ।।११२।।

अध्वानो अग्न आवह । रायस्पोषं सहस्रिणं ॥१॥ येते सहस्रमयुतं पाशाः । मृत्यो मर्त्या
य हंतवे । तान्यज्ञस्य मायया । सर्वानव यजामहे । भक्षोस्यमृत भक्षः । तस्य ते मृत्युपीतस्या
मृतवतः । स्वगाकृतस्य मधुमतः । उपहूतस्योपहूतो भक्षयामि । मंद्राभिभूतिः केतुर्यज्ञानां
वाक् । असावेहि ॥२॥ अंधो जागृविः प्राण । असावेहि । बधिर आक्रंदइ तरपान । असा
वेहि । अहस्तोस्त्वा चक्षुः । असावेहि । अपादाशो मनः । असावेहि । कवे विप्रचित्त श्रो
त्र । असावेहि ॥३॥ सुहस्तः सुवासाः । शूषानामास्यमृतो मर्त्येषु । तं त्वाहं तथा वेद । अ
सावेहि । अग्निर्मे वाचि श्रितः । वाग्घृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । वा
युर्मे प्राणे श्रितः ॥४॥ प्राणो हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । सूर्यो मे
चक्षुषि श्रितः । चक्षुर्हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । चंद्रमा मे मन
सि श्रितः ॥५॥ मनो हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । दिशो मे श्रो

त्रेश्रिताः। श्रोत्रꣳहृदये। हृदयंमयि। अहममृते। अमृतंब्रह्मणि। आपोमेरेतसिश्रिताः॥६॥
रेतोहृदये। हृदयंमयि। अहममृते। अमृतंब्रह्मणि। पृथिवीमेशरीरेश्रिता। शरीरꣳ
हृदये। हृदयंमयि। अहममृते। अमृतंब्रह्मणि। ओषधिवनस्पतयोमेलोमसुश्रिताः।
॥७॥ लोमानिहृदये। हृदयंमयि। अहममृते। अमृतंब्रह्मणि। इन्द्रोमेबलेश्रितः।
बलꣳहृदये। हृदयंमयि। अहममृते। अमृतंब्रह्मणि। पर्जन्योमेमूर्ध्निश्रितः।
॥८॥ मूर्धाहृदये। हृदयंमयि। अहममृते। अमृतंब्रह्मणि। ईशानोमेमन्यौश्रितः।
मन्युर्हृदये। हृदयंमयि। अहममृते। अमृतंब्रह्मणि। आत्मामआत्मनिश्रितः॥९॥
आत्माहृदये। हृदयंमयि। अहममृते। अमृतंब्रह्मणि। पुनर्मआत्मापुनरायुरागात्।
पुनःप्राणःपुनराकूतमागात्। वैश्वानरोरश्मिभिर्वावृधानः। अंतस्तिष्ठत्वमृतस्यगोपाः॥१०॥

सहस्त्रिणामिति श्रोत्रा सावे हि प्राणे श्रितो मनसि श्रितो रेतसि श्रितो लोमसु श्रितो मू
र्ध्नि श्रित आत्मनि श्रितोष्टौ च ॥ ८ ॥ अग्निर्वायुः सूर्यश्चंद्रमा दिश आपः पृथि
व्योषधिवनस्पतय इंद्रः पर्जन्य ईशान आत्मा पुनर्मे ॥ ९ ॥ प्रजापतिर्देवानसृजत ।
ते पाप्मना संदिता अजायंत । तान्व्यद्यत् । यद्व्यद्यत् । तस्माद्विद्युत् । तमस्तृण्वत् । य
दस्तृण्वत् । तस्माद्वृष्टिः । तस्माद्यत्रैते देवते अभिप्राप्नुतः । वि चैवास्य तत्र पाप्मा
नं घ्नतः ॥ १ ॥ दृष्टे तस्य । सैषा मीमांसाग्निहोत्र एव संपन्ना । अथो आहुः । सर्वेषु
यज्ञक्रतुष्विति । होष्यन्नुपस्पृशेत् । विद्युदसि विद्य मे पाप्मानमिति । अथ हु
त्वोपस्पृशेत् ॥ वृष्टिरसि वृश्च मे पाप्मानमिति । यक्ष्यमाणो वा हुत्वा वा । वि चैवा
स्यैते देवते पाप्मानं घ्नतः ॥ २ ॥ दृष्टे तस्य । अयं हो हारुणिः । ब्रह्मचारि

श्री व.र.०।

॥१२२॥

122

पापप्रश्नाश्रोचयिजिघायु । परेहि । प्लक्षोदय्यांपातिं पृच्छ । वेत्थ सावित्रीं३ न वेत्था३ इति ।
तस्मा ग स पप्रच्छ । आचार्यो मा प्राहैषीत् । वेत्थ सावित्रीं३ न वेत्था३ इति । स
होवाच वेदेति ॥३॥ स कस्मिन्प्रतिष्ठितेति । परोरजसीति । कस्तत्परोर
जा इति । एष वाव स परोरजा इति होवाच । य एष तपति । एषो वीरजा
इति । स कस्मिंत्वेष इति । सत्य इति । किं तत्सत्यमिति । तप इति ॥४॥ क
स्मिंनु तप इति । बल इति । किं तद्बलमिति । प्राण इति । मा स्म प्राणमतिप्र
च्छ इति मा चार्योब्रवीदिति होवाच ब्रह्मचारी । स होवाच प्लक्षोदय्योपा
तिः । यद्वै ब्रह्मचारिन्प्राणमत्यप्रक्ष्यः मूर्धा ते व्यपतिष्यत् । आहमुत

॥१२२॥

आचार्यायान्यविद्याभि। यो मासा वित्रिसमवादिष्टेति॥५॥ तस्मात्सावित्रे नसंवदेत।
स यो ह वै सावित्रं विदुषा सावित्रे संवदते। स हास्मिं श्रियं दधाति। अनु ह वा अस्मा
असौ तपः श्रियं मन्यते। अन्वस्मै श्रीस्तपो मन्यते। अन्वैस्मै तपो बलं मन्यते। अन्वस्मै ब
लं प्राणं मन्यते। स यदाह। संज्ञानं विज्ञानं दर्शादृष्टेति। एष एव तत्॥६॥ अथ यदाह। प्र
स्तुतं विष्टुतं संस्तुतं सुतास्तुन्वतीति। एष एव तत्। एष ह्येव तान्यहानि। एष रात्रयः। अथ य
दाह। चित्रः केतुर्दाता प्रदाता सविता प्रसविताभिशास्तानुमंतेति। एष एव तत्। ए
ष ह्येव ते होमुहूर्ताः। एष रात्रेः॥७॥ अथ यदाह। पवित्रं पवयिष्यन्सहस्वान्सहीया
न्नरुणोरुणरजा इति। एष एव तत्। एष ह्येव ते र्धमासाः। एष मासाः। अथ यदाह।
अग्निष्टोम उक्थ्योऽग्निरृतुः प्रजापतिः संवत्सर इति। एष एव तत्। एष ह्येव ते यज्ञ

ऋतवः। एषऋतवः॥८॥ एषसंवत्सरः। अथयदाह। इदानीं तदानीमिति। एषएवतत्। एषह्येवेमेमुहूर्तानां
मुहूर्ताः। जनकोहवैदेहः। अहोरात्रैःसमाजगामा तंहोचुः। योवाअस्मान्वेद। विजहत्पाप्मानमेति॥९॥
सर्वमायुरेति। अभिस्वर्गंलोकंजयति। नास्यामुष्मिंल्लोकेऽन्नंक्षीयतइति। विजहद्धवैपाप्मानमेति।
सर्वमायुरेति। अभिस्वर्गंलोकंजयति। नास्यामुष्मिंल्लोकेऽन्नंक्षीयते। यएवंवेद। अहीनाहाश्वथ्यः। सा
वित्रंविदांचकार॥१०॥ सहहंसोहिरण्मयोभूत्वा। स्वर्गंलोकमियाय। आदित्यस्यसायुज्यं। हंस
सोहवैहिरण्मयोभूत्वा। स्वर्गंलोकमेति। आदित्यस्यसायुज्यं। यएवंवेद। देवभागोहश्रौतर्षिः। सा
वित्रंविदांचकार। तंहवागदस्यमानाभ्युवाच॥११॥ सर्वंबतगोतमोवेद। यःसावित्रंवेदेति।
अयमहंसावित्रः। देवानामुत्तमोलोकः। गुह्यंमहोबिभ्रदिति। एता
सहोवाच। केषावागसीति। यज्ञोपवीतेकृत्वाप्योनिपपात। नमोनमइत्यैसहोवाच। मात्रैषीर्गोतम। जितवैतेलो
कइति। तस्माद्येकेचसावित्रंविदुः। सर्वेतेजितलोकाः। सयोहवैसावित्रस्याष्टाक्षरंपदंश्रिया
भिषिक्तंवेद। श्रियाहैवाभिषिच्यते। घृणिरितिद्वेअक्षरे। सूर्यइतित्रीणि। आदित्यइतित्रीणि॥१२॥ ॥१२३॥

एतद्ध सावित्रस्याष्टाक्षरं पदं श्रियाभिषिक्तं। य एवं वेद। श्रिया हैवाभिषिच्यते। तदेतदृचाभ्युक्तं। ऋचो अक्ष
रे परमे व्योमन्। यस्मिन् देवा अधि विश्वे निषेदुः। यस्तन्न वेद किमृचा करिष्यति। य इत्तद्विदुस्त इमे समासत
न३ इति। न ह वा एतस्यर्चा न यजुषा साम्नार्थोऽस्ति। यः सावित्रं वेद ॥१४॥ तदेतत्सरियद्देवचक्रे। आ
र्द्रं पिन्वमानं स्वर्गं लोकमेति। विजहद्विश्वा भूतानि संपश्यत्। आर्द्रो ह वै पिन्वमानः स्वर्गं लोक
मेति। विजहद्विश्वा भूतानि संपश्यन्। य एवं वेद। धृषो ह वै वार्ष्णेयः आदित्येन समाजगाम।
तं होवाच। एहि सावित्रं विद्धि। अयं वै स्वर्ग्योऽग्निः पारयिष्णुरमृतात्संभृत इति। एष वाव सावित्रः। स५
य एष तपति। एहीमं विद्धि। इति हैवैनं तदुवाच ॥१५॥ धृतो ह तौ वै तेन तप इत्संबोदितेन तज्ज्ञात्वे
क्रेन वक्ति चकारो वाचनमाद्यत्यादित्य इति त्रीणि सावित्रं वेदविद्धि पंचच ॥१६॥ इयं वाव सर
घा। तस्या अग्निरेव सारघं मधु। या एताः पूर्वपक्षापरपक्षयो रात्रयः। ता मधुकृतः। यान्यहा
नि। ते मधुवृषाः। स यो ह वा एता मधुकृतश्च मधुवृषांश्च वेद। कुर्वन्ति हास्यैता अग्नौ मधु

दे५ तिं४ म४

नास्येष्टापूर्तं धयंति। अथ यो न वेद॥१॥ न हास्यैता अग्नेयमधुकुर्वंति। धयंत्यस्येष्टापूर्तं। यो ह वा अहोरा
त्राणां नामधेयानि वेद। [stain] नाहोरात्रेष्वार्तिमार्च्छति। संज्ञानं विज्ञानं दर्शादृष्टेति। एतावनुवाकौ पूर
१२४ र्वपक्षस्याहोरात्राणां नामधेयानि। [stain] प्रस्तुतं विष्टुतꣳ सुतासुन्वतीति। एतावनुवाकावपरपक्ष
स्याहोरात्राणां नामधेयानि। नाहोरात्रेष्वार्तिमार्च्छति। य एवं वेद॥२॥ यो ह वै मुहूर्तानां नाम
धेयानि वेद। न मुहूर्तेष्वार्तिमार्च्छति। चित्रः केतुर्दाता प्रदाता सविता प्रसविताभिशास्तानुमं
५ना तेति। एतेनुवाका मुहूर्तानां नामधेयानि। न मुहूर्तेष्वार्तिमार्च्छति। य एवं वेद। यो ह वा अर्धमासा
नां च मासानां च नामधेयानि वेद। नार्धमासेषु न मासेष्वार्तिमार्च्छति। पवित्रं पवयिष्यन्त्सहस्वा
न्त्सहीयानरुणोऽरुणरजा इति। एतेनुवाका अर्धमासानां च मासानां च नामधेयानि॥३॥ ना
र्धमासेषु न मासेष्वार्तिमार्च्छति। य एवं वेद। यो ह वै यज्ञक्रतूनां चर्तूनां च संवत्सरस्य च नाम
धेयानि वेद॥ न यज्ञक्रतुषु नर्तुषु न संवत्सर आर्तिमार्च्छति। [stain] अग्निष्टोममुक्थ्योऽग्निरृतुः ॥१२४॥

प्रजापतिः संवत्सर इति। एतेनु वाकायज्ञक्रतूनां चर्तूनां च संवत्सरस्य च नामधेयानि न
यज्ञक्रतुषु नर्तुषु न संवत्सर आर्त्तिमार्च्छति य एवं वेद यो ह वै मुहूर्त्तानां मुहूर्त्तान्वेद न मु
हूर्त्तानां मुहूर्त्तेष्वार्त्तिमार्च्छति ४ इदानीं तदानीमिति एते वै मुहूर्त्तानां मुहूर्त्ताः न मुहूर्त्तानां मुहूर्त्ते
ष्वार्त्तिमार्च्छति य एवं वेद अथो यथा क्षेत्रज्ञो भूत्वानुप्रविश्यान्नमत्ति एवमेवैतान्क्षेत्रज्ञो भू
त्वानुप्रविश्यान्नमत्ति स एवैषामेव सलोकताꣳ सायुज्यमश्नुते अप पुनर्मृत्युं जयति य
एवं वेद ५ न वेदैवं वेदानुवाका अर्धमासानां च मासानां च नामधेयानि मुहूर्त्तेष्वार्त्तिमार्च्छ
ति न कच १० इयमहोरात्राणाꣳ संज्ञानं स्तुतं मुहूर्त्तानां चित्रः केतुरर्धमासानां पवित्रं यज्ञक्रतू
नामग्निष्टोमो मुहूर्त्तानां मुहूर्त्तेष्वेदेदानीमथो यथा क्षेत्रज्ञो द्वादश॥ कश्चिद्ध वा अस्माल्लोका
त्प्रेत्य आत्मानं वेद अयमहमस्मीति कश्चित्स्वं लोकं न प्रतिप्रजानाति अथ यो ह वै तमग्नि
ꣳ सावित्रं वेद। स एवास्माल्लोकात्प्रेत्य आत्मानं वेद। अयमहमस्मीति।१। स स्वं लोकं प्रति
प्रजानाति। एष उ वेवैनं तत्सावित्रः। स्वर्गं लोकमभिवहति। अहोरात्रे वा इदꣳ सयुग्भिः क्रियते।

२ अग्निमुग्धो हैव धूमतान्तः। स्वं लोकं न प्रतिप्रजानाति ३

ब्रा०त०
१२५
125

इतिरात्र्या यादीक्षिषता इतिरात्र्याय व्रतमुपागुरिति तानिहा न वं विदुषः अमुष्मिन्लोके
नैवक्षिंध्ययंति धीतं ह वसशे व धिमनुपरैति अथयोहै तमग्निं सावित्रं वेद २
तस्यहै वा होरा त्राणि। अमुष्मिन्लोके शेव धिं न ध्ययंति। अ धीतं ह वस शे व धिम नुप रे
ति। भरद्वाजो ह त्रिभिरायुर्भिर्ब्रह्मचर्यमु वास। तं ह जीर्णिं स्थविरं शयानं। इंद्र उप
व्रज्यो वा च। भरद्वाज। यत्ते चतुर्थमायुर्दद्यां। किमेनेन कुर्या इति। ब्रह्मचर्यमेवैने
न चरेयमिति होवाच ३ तं ह त्रीन गिरिरूपा नविज्ञाता निव दर्शयाञ्चकार। तेषां हैकैकस्मान्मु
ष्टिनाददे। स होवाच भरद्वाजेत्यामंत्र्य। वेदा वा एते। अनंता वै वेदाः। एतद्वा एतैस्त्रिभिरायुर्भि
रन्ववोचथाः। अथत इतरननूक्तमेव। एहीमं विद्धि। अयं वै सर्वविद्येति ४ तस्मै ह तमग्निं सा
वित्रमुवाच। तं स विदित्वा। अमृतो भूत्वा। स्वर्गं लोकमियाय। आदित्यस्य सायुज्यं। अमृतो है
व भूत्वा। स्वर्गं लोकमेति। आदित्यस्य सायुज्यं। य एवं वेद। एषो एव त्रयीविद्या ५ यावंतं ह वै त्र
य्या विद्यया लोकं जयति। तावंतं लोकं जयति। य एवं वेद। अग्नेर्वा एतानि नामधेयानि। अग्ने

रेवसायुज्यं सलोकतामाप्नोति। यएवंवेद। वायोर्वा एतानि नामधेयानि। वायोरेव सायुं्ं सलोकतामाप्नोति। यएवंवेद। इंद्रस्य वा एतानि नामधेयानि ६ इंद्रस्यैव सायुज्यं्ं सलोकतामाप्नोति। यएवंवेद। बृहस्पतेर्वा एतानि नामधेयानि। बृहस्पतेरेवसायुज्यं्ं सलोकतामाप्नोति। यएवंवेद। प्रजापतेर्वा एतानि नामधेयानि प्रजापतेरेवसायुं्ं ज्यं्ं सलोकतामाप्नोति। यएवंवेद। ब्रह्मणो वा एतानि नामधेयानि। ब्रह्मण एव सायुज्यं्ं सलोकतामाप्नोति। यएवंवेद। सवा एषोऽग्निरपक्षपुछो वायुरेव। तस्याग्निर्मुखं। असावादित्यः शिरः। सयदेते देवते अंतरेण। तत्सर्वं्ं सीव्यति। तस्मात्सावित्रः। ७। अयमहमस्मीति वेद होवाच सर्ववीद्येति विद्येद्रस्य वा एतानि नामधेयानि ब्रह्मण एव सायुज्यं्ं सलोकतामाप्नोति स प्तच ११ अ

